श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २३

*दक्षचरितं, चित्रकेतूपाख्यानं, वृत्रवधवर्णनं मरुदुत्पत्तिवर्णनं च*

प्राचेतसस्तु भगवन्नपरो हि दक्ष-
    स्त्वत्सेवनं व्यधित सर्गविवृद्धिकामः।
आविर्बभूविथ तदा लसदष्टबाहु-
    स्तस्मै वरं ददिथ तां च वधूमसिक्नीम्॥ १ ॥

तस्यात्मजास्त्वयुतमीश पुनस्सहस्रं
    श्रीनारदस्य वचसा तव मार्गमापुः।
नैकत्रवासमृषये स मुमोच शापं
    भक्तोत्तमस्त्वृषिरनुग्रहमेव मेने॥ २ ॥

षष्ट्या ततो दुहितृभिः सृजतः कुलौघान्
    दौहित्रसूनुरथ तस्य स विश्वरूपः।
त्वत्स्तोत्रवर्मितमजापयदिन्द्रमाजौ
    देव त्वदीयमहिमा खलु सर्वजैत्रः॥ ३ ॥

प्राक्शूरसेनविषये किल चित्रकेतुः
    पुत्राग्रही नृपतिरङ्गिरसः प्रभावात्।
लब्ध्वैकपुत्रमथ पुत्र हते सपत्नी-
    सङ्घैरमुह्यदवशस्तव माययासौ॥ ४ ॥

तं नारदस्तु सममङ्गिरसा दयालुः
    सम्प्राप्य तावदुपदर्श्य सुतस्य जीवम्।
कस्यास्मि पुत्र इति तस्य गिरा विमोहं
    त्यक्त्वा त्वदर्चनविधौ नृपतिं न्ययुङ्क्त॥ ५ ॥

स्तोत्रं च मन्त्रमपि नारदतोऽथ लब्ध्वा
तोषाय शेषवपुषो ननु ते तपस्यन्।
विद्याधराधिपतितां स हि सप्तरात्रे
लब्ध्वाप्यकुण्ठमतिरन्वभजद्भवन्तम्॥ ६ ॥

तस्मै मृणाळधवळेन सहस्रशीर्ष्णा
रूपेण बद्धनुतिसिद्धगणावृतेन।
प्रादुर्भवन्नचिरतो नुतिभिः प्रसन्नो
दत्वाऽऽत्मतत्त्वमनुगृह्य तिरोदधाथ॥ ७ ॥

त्वद्भक्तमौलिरथ सोऽपि च लक्षलक्षं
वर्षाणि हर्षलमना भुवनेषु कामम्।
सङ्गापयन् गुणगणं तव सुन्दरीभिः
सङ्गातिरेकरहितो ललितं चचार॥ ८ ॥

अत्यन्तसङ्गविलयाय भवत्प्रणुन्नो
नूनं स रौप्यगिरिमाप्य महत्समाजे।
निश्शङ्कमङ्ककृतवल्लभमङ्गजारिं
तं शङ्करं परिहसन्नुमयाभिशेपे॥ ९ ॥

निस्सम्भ्रमस्त्वयमयाचितशापमोक्षो
वृत्रासुरत्वमुपगम्य सुरेन्द्रयोधी।
भक्त्यात्मतत्वकथनैः समरे विचित्रं
शत्रोरपि भ्रममपास्य गतः पदं ते॥ १० ॥

त्वत्सेवनेन दितिरिन्द्रवधोद्यताऽपि
तान्प्रत्युतेन्द्रसुहृदो मरुतोऽभिलेभे।
दुष्टाशयेऽपि शुभदैव भवन्निषेवा
तत्तादृशस्त्वमव मां पवनालयेश॥ ११ ॥

**********